| | |
|---|---|
| विषयः (Subject) | संस्कृतम् (Sanskrit) |
| पत्रसंख्या (Paper Number) | 8 |
| पत्रविषयः (Title) | वैदिकग्रन्थाः व्याकरणं च<br>(Vedic Texts and Grammar) |
| पाठ्यांशसंख्या पाठ्यांशनाम<br>(Module Number & Module Name) | 22, हिरण्यगर्भसूक्तोक्तमन्त्राणां पाठः<br>(Mantras of *Hiranyagrabhasuktam*) |
| पाठ्यांशतत्त्वानि<br>(Focal Points of The Module) | { ऋग्वेद-सूक्तम् (हिरण्यगर्भसूक्तम्-10/121)}<br>1. हिरण्यगर्भसूक्तस्य परिचयो महत्त्वञ्च \|<br>2. हिरण्यगर्भसूक्तोक्तमन्त्राणां पाठः \| |
| प्रमुखान्वेषकः<br>(Principal Investigator) | सह-प्रमुखान्वेषकः<br>(Co-Principal Investigator) |
| प्रो.रमेशकुमारपाण्डेयः,<br>कुलपतिः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्,<br>नवदेहली 110016 | प्रो.वे.कुटुम्बशास्त्री,<br>पूर्वकुलपतिः,राष्ट्रीयसंस्कृतसंस्थानम्,नवदेहली<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी<br>सोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |

| | | |
|---|---|---|
| समन्वयकः<br>(Co-ordinator) | पाठ्यांशलेखकः<br>(Content Writer) | समीक्षकः<br>(Reviewer) |
| प्रो.एस्.एन्.रमामणिः,<br>अद्वैतवेदान्तविभागः,<br>श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली 110016 | डा. सुन्दरनारायणझाः,<br>सहायकाचार्यो वेदविभागस्य,<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विद्यापीठम्, नवदेहली 110016 | प्रो.श्रीकृष्णशर्मा,<br>निदेशकचरः,<br>संस्कृतप्राच्यविद्या-संस्थानम्, कुरुक्षेत्रम् |
| पाठ्यांशसंलग्नकम्<br>(Module Tag) | SAN_P8_M22 | |

| आयोजकसंस्था (Anchor Institute) |
|---|
| श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली 110016 |

विषयसूची-


1.0 प्रस्तावना
2.0 हिरण्यगर्भसूक्तस्य परिचयो महत्त्वञ्च
3.0 हिरण्यगर्भसूक्तोक्तमन्त्राणां पाठः |
3.1 हिरण्यगर्भः समवर्तताग्रे इति प्रथममन्त्रस्य पाठः |
3.1.1 पदपाठः
3.1.2 अन्वयः
3.1.3 शब्दार्थः
3.1.4 व्याख्या
3.2 य आत्मदा बलदा इति द्वितीयमन्त्रपाठः |
3.2.1 पदपाठः
3.2.2 अन्वयः
3.2.3 शब्दार्थः
3.2.4 व्याख्या
3.3 यः प्राणतो निमिषतो इति तृतीयमन्त्रस्य पाठः |
3.3.1 पदपाठः
3.3.2 अन्वयः
3.3.3 शब्दार्थः
3.3.4 व्याख्या
3.4 यस्येमे हिमवन्तो महित्वा इति चतुर्थमन्त्रस्य पाठः |
3.4.1 पदपाठः
3.4.2 अन्वयः
3.4.3 शब्दार्थः
3.4.4 व्याख्या
3.5 येन द्यौरुग्रा पृथिवी च दृढा इति पञ्चममन्त्रस्य पाठः |
3.5.1 पदपाठः
3.5.2 अन्वयः
3.5.3 शब्दार्थः
3.5.4 व्याख्या
3.6 यं क्रन्दसी अवसा तस्तभाने इति षष्ठमन्त्रस्य पाठः |
3.6.1 पदपाठः

3.6.2 अन्वयः
3.6.3 शब्दार्थः
3.6.4 व्याख्या
3.7 आपो ह यद्बृहतीर्विश्वमायन् इति सप्तममन्त्रस्य पाठः |
3.7.1 पदपाठः
3.7.2 अन्वयः
3.7.3 शब्दार्थः
3.7.4 व्याख्या
3.8 यश्चिदापो महिना पर्यपश्यत् इति अष्टममन्त्रस्य पाठः |
3.8.1 पदपाठः
3.8.2 अन्वयः
3.8.3 शब्दार्थः
3.8.4 व्याख्या
3.9 मा नो हिंसीज्जनिता यः पृथिव्या इति नवममन्त्रस्य पाठः |
3.9.1 पदपाठः
3.9.2 अन्वयः
3.9.3 शब्दार्थः
3.9.4 व्याख्या
3.10 प्रजापते न त्वदेतान्यन्यः इति दशममन्त्रस्य पाठः |
3.10.1 पदपाठः
3.10.2 अन्वयः
3.10.3 शब्दार्थः
3.10.4 व्याख्या
4.0 विषयसङ्ग्रहः

## 1.0 प्रस्तावना-

विश्वस्याद्यो ग्रन्थः, भारतीयधर्मस्य च कमनीयकल्पद्रुमः, आर्यसंस्कृत्याः प्राणभूता इमे वेदा एव सन्ति | ते च वेदाः स्वरूपभेदात्त्रिविधाः संहिताभेदाच्च चत्वारः सन्ति | वेदेषु मुख्यरूपेण यागानुष्ठानादीनां वर्णनानि सन्ति | यागानामेकविंशतिसंस्थाः प्रोक्ताः- **सप्त पाकयज्ञसंस्थाः, सप्त हविर्यागसंस्थाः, सप्त च सोमयागसंस्था**स्तेषु यागेषु सर्वप्राचीनोऽयं यागः सृष्टिनिर्माणात्मकः | सृष्ट्युत्पादकयागानां वर्णने प्रस्तुतान्यनेकानि ऋग्वैदिकसूक्तानि अस्माकं समक्षं सन्त्युपस्थितानि | तेषामध्ययनेन तत्तद्विशिष्टविषयाणामवबोधो जायते | तादृशेषु सूक्तेषु हिरण्यगर्भसूक्तस्य महत्त्वपूर्णं स्थानमस्ति | अतोधुना तस्याध्ययनमारभ्यते |

## 2.0 हिरण्यगर्भसूक्तस्य परिचयो महत्त्वञ्च-

ऋग्वेदस्य दशमे मण्डले एकनवत्युत्तरशतं (191) सूक्तानि सन्ति | अस्मिन् मण्डलेऽनेकविधानि दार्शनिकसूक्तानि समुपलब्धानि सन्ति | तेष्वेकविंशत्युत्तरशततमं (121) सूक्तमिदं हिरण्यगर्भसूक्तमस्ति | अत्र दश ऋचः सन्ति | अस्य सूक्तस्य हिरण्यगर्भो ऋषिः, 'क'संज्ञकप्रजापतिर्देवता त्रिष्टुप्च्छन्दश्चास्ति |

प्रस्तुतेऽस्मिन् सूक्ते स्तुतस्य देवस्य नाम हिरण्यगर्भः प्रजापतिः जगद्बीजपुरुषोऽस्ति | योऽयं प्रजापतिरत्र हिरण्मयाण्डरूपेण वर्णितः स एव पुरुषसूक्ते विराडुपाधिधारकः **ततो विराडजायत विराजो अधिपूरुषः** इत्यनेन मन्त्रेण वर्णित इति प्रतीयते | अस्य विराट्पुरुषस्य विषयेऽपि तत्र **पुरुष एवेदं सर्वम् , स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः** इत्यादिकमुक्तमस्ति | तेन सामञ्जस्यस्थापनविधिना एवं वक्तुं शक्यते यत् पुरुषसूक्ते यो विराडस्ति स एवात्र प्राकृतिकेनाण्डविशेषेणोक्तः | अर्थान्नासदीयसूक्तोक्तान्मूलपुरुषात् हिरण्यगर्भात्मकः जगद्बीजपुरुषः समुत्पन्न इति कथनं युक्तियुक्त एव | तस्मादेवादिपुरुषादिदं समस्तं प्रपञ्चं समुद्भूतमिति सर्वैरनुज्ञायत एव | तस्येतिवृत्तानामध्ययनाय सूक्तोक्तमन्त्राणामध्ययनमनिवार्यम्, फलतो हिरण्यगर्भसूक्तस्य पाठ आरभ्यते |

3.0 हिरण्यगर्भसूक्तोक्तमन्त्राणां पाठः |

3.1 हिरण्यगर्भः समवर्तताग्रे इति प्रथममन्त्रस्य पाठः |

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् |**

**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ||**

3.1.1 पदपाठः

हिरण्यगर्भः | सम् | अवर्तत | अग्रे | भूतस्य
जातः | पतिः | एकः | आसीत् |
सः | दाधार | पृथिवीम् | द्याम् | उत | इमाम् |
कस्मै | देवाय | हविषा विधेम ||

3.1.2 अन्वयः

हिरण्यगर्भः अग्रे समवर्तत | जातः भूतस्य एकः पतिः आसीत् | सः पृथिवीम् उत इमाम् द्याम् दाधार | कस्मै देवाय हविषा विधेम |

3.1.3 शब्दार्थः

**हिरण्यगर्भः=** हिरण्मयाण्डे गर्भभूतः जगद्बीजपुरुषः प्रजापतिः, **अग्रे=** सर्वप्रपञ्चोत्पत्तेः प्राक्, **समवर्तत=** मायाध्यक्षात् परमात्मनः सकाशात् समजायत | **जातः=** उत्पन्नः सन् एव, **भूतस्य=** सर्वस्य जगतः, **एकः=** अद्वितीयः, **पतिः=** ईश्वरः, **आसीत्=** बभूव | **सः=** हिरण्यगर्भः, **पृथिवीम्=** अन्तरिक्षम्, **उत=** अपि च, **इमाम्=** अस्माभिर्दृश्यमानां पृथिवीं, **द्याम्=** द्युलोकम्, **दाधार=** धारितवान्, | **कस्मै=** 'प्रजापतिर्वै कः' इति श्रुत्या 'क' संज्ञकाय अस्मै सुखस्वरूपाय, **देवाय=** दानादिगुणयुक्ताय, **हविषा=** पुरोडाशादिभिर्हविर्द्रव्यैः, **विधेम=** परिचरेम |

3.1.4 व्याख्या

हिरण्यगर्भः जगद्बीजभूतः प्रजापतिः हिरण्मयाण्डगर्भभूतः अग्रे सर्वप्रपञ्चोत्पत्तेः प्राक् समवर्तत मायाध्यक्षात्सिसृजोः परमात्मनः सकाशाद् समजायत स जातः उत्पन्नः सन् भूतस्य समस्तविकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः एकः अद्वितीयः पतिः ईश्वर आसीत् | सः परमात्मा पृथिवीं ( निघण्टौ पृथिव्या अन्तरिक्षनामसु पठितत्वात् पृथिवीति शब्देनान्तरिक्षस्य बोधो जायते) अन्तरिक्षं द्यां द्युलोकं उतापि च इमां पुरो दृश्यमानां भूमिं दाधार धारयति | कस्मै 'प्रजापतिर्वै कः' क-संज्ञकायास्मै सुखस्वरूपाय देवाय दानादिगुणविशिष्टाय हविषा पुरोडाशेन विधेम परिचरेम इत्यर्थः |

### 3.2 य आत्मदा बलदा इति द्वितीयमन्त्रपाठः |

**य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः |**

**यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ||**

### 3.2.1 पदपाठः

यः | आत्मऽदाः | बलऽदाः | यस्य | विश्वे |
उपऽआसते | प्रऽशिषम् | यस्य | देवाः |
यस्य | छाया | अमृतम् | यस्य | मृत्युः |
कस्मै | देवाय | हविषा | विधेम ||

### 3.2.2 अन्वयः

यः आत्मदाः, बलदाः, यस्य प्रशिषम् विश्वे उपासते, यस्य देवाः | अमृतम् यस्य छाया, मृत्युः यस्य |कस्मै देवाय हविषा विधेम

### 3.2.3 शब्दार्थः

**यः=** यो हिरण्यगर्भः प्रजापतिः, **आत्मदाः=** आत्मानां दाता, **बलदाः=** बलस्य दाता, **यस्य=** परमात्मनः, **प्रशिषम्=** शासनम्, **विश्वे=** विश्वे सर्वे प्राणिनः, **उपासते=** सेवन्ते, **यस्य=** हिरण्यगर्भस्याज्ञाम्, **देवाः=** इन्द्रादयो देवा अपि यस्य प्रशासनमुपासन्ते | **अमृतम्=** अमृतत्वं अमरणत्वम्, **यस्य=** प्रजापतेः, **छाया=** छायेव वशवर्ति भवति, **मृत्युः=** यमः प्राणापहारिदेवः, **यस्य=** प्रजापतेः छायेव भवति, **कस्मै=** तस्मै "क"संज्ञकप्रजापतये, सुखस्वरूपाय, **देवाय=** दानशीलाय, **हविषा=** आज्यपशुसोमादिभिर्द्रव्यैः पुरोडाशात्मना, **विधेम=** परिचरेम सेवेम |

### 3.2.4 व्याख्या

यो हिरण्यगर्भः प्रजापतिः आत्मदाः आत्मानामर्थाज्जीवनस्य दाता अस्ति, यश्च बलदाः बलस्य दाता अस्ति, यस्य परमात्मनः प्रशिषं प्रशासनं विश्वे सर्वे प्राणिनः चराचरात्मकाः जीवाः, यस्य प्रशासनञ्च पुनः देवाः सर्वसामर्थ्यशालिनः देदीप्यमानाः देवाः प्रार्थयन्ते सेवन्ते, अमृतं दिव्यलोकः मृत्युश्च यमलोको यस्य प्रजापतेः छायेव वशवर्ति भवति कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

3.3 यः प्राणतो निमिषतो इति तृतीयमन्त्रस्य पाठः |

**यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव |**

**य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ||**

3.3.1 पदपाठः

यः | प्राणतः | निऽमिषतः | महिऽत्वा |
एकः | इत् | राजा |जगतः | बभूव |
यः | ईशे | अस्य | द्विऽपदः | चतुःऽपदः |
कस्मै | देवाय | हविषा | विधेम ||

3.3.2 अन्वयः

यः एकः इत् महित्वा प्राणतः निमिषतः जगतः राजा बभूव | यः अस्य द्विपदः चतुष्पदः ईशे | कस्मै देवाय हविषा विधेम |

3.3.3 शब्दार्थः

**यः=** हिरण्यगर्भः, **एकः=** एकः सन् अद्वितीयः, **इत्=** एव, **महित्वा=** स्वकीयेन माहात्म्येन महिम्रा, **प्राणतः=** प्रश्वसतः, **निमिषतः=** अक्षिपक्ष्मचलनं कुर्वतः, **जगतः=** गतिशीलस्यास्य संसारस्य, **राजा=** प्रभुरीश्वरो वा, **बभूव=** भवति | **यः=** यश्च प्रजापतिः, **अस्य=** परिदृश्यमानस्य, **द्विपदः=** द्विपादयुक्तस्य मनुष्यादेः, **चतुष्पदः=** चतुष्पादयुक्तस्य गवाश्वादेः, **ईशे=** स्वामी भवति | **कस्मै=** 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय=** दानशीलाय, **हविषा=** हविर्द्रव्येण, **विधेम=** परिचरेम |

3.3.4 व्याख्या

यो हिरण्यगर्भः एकलः सन् अद्वितीय एव महित्वा स्वकीयेन उद्गूर्णमाहात्म्येन प्राणतः श्वासोच्छवासं गृह्णतः निमिषतः अक्षिपक्ष्मचलनं कुर्वतः जगतः जङ्गमस्य प्राणिमात्रस्य राजा प्रभुः बभूव भवति, यश्च प्रजापतिः अस्य विद्यमानस्य द्विपदो पादद्वययुक्तस्य मनुष्यादेः, चतुष्पदः पादचतुष्टयोपेतस्य गवाश्वादेः ईशे स्वामी भवति, कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

3.4 यस्येमे हिमवन्तो महित्वा इति चतुर्थमन्त्रस्य पाठः |

**यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः |**

**यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ||**

3.4.1 पदपाठः

यस्य | इमे | हिमऽवन्तः | महिऽत्वा |
यस्य | समुद्रम् | रसया | सह | आहुः |
यस्य | इमाः | प्रऽदिशः | यस्य | बाहू | इति |
कस्मै | देवाय | हविषा | विधेम ||

3.4.2 अन्वयः

इमे हिमवन्तः यस्य महित्वा आहुः, रसया सह समुद्रम् यस्य, इमाः प्रदिशः यस्य, बाहू यस्य, कस्मै देवाय हविषा विधेम |

3.4.3 शब्दार्थः

**इमे=** दृश्यमानाः, **हिमवन्तः=** हिमालयादयः पर्वताः, **यस्य=** प्रजापतेः, **महित्वा=** माहात्म्यमैश्वर्यम्, **आहुः=** कथयन्ति, **रसया=** रसो जलम् तदस्यामस्ति इति रसा, नदी, तया रसया, **सह=** नदीभिस्सह, **समुद्रम्=** अर्णवः, **यस्य=** परमात्मनो माहात्म्यमुपवर्णयन्ति, **इमाः=** प्राच्यारंभाः प्रधानाः दिशः, **प्रदिशः=** आग्नेय्याद्याः कोणदिशः, **यस्य=** प्रजापतेः, **बाहू=** वामदक्षिणौ बाहूरूपे स्तः, (भुजवत्प्राधान्ययुक्ताः दिशः प्रदिशश्च) **यस्य=** महिमानं प्रकाशयन्ति, **कस्मै=** 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय=** दानशीलाय, **हविषा=** हविर्द्रव्येण, **विधेम=** परिचरेम |

3.4.4 व्याख्या

इमे दृश्यमानाः हिमवन्तो हिमा अस्मिन् सन्तीति हिमवान्, बहुवचने हिमवन्तः तादृशाः सर्वे पर्वताः हिमालयादयो यस्य प्रजापतेः महित्वा माहात्म्यमैश्वर्यं वा कथयन्ति तथा रसया सह रसो जलं तद्वती रसा नदी रसादिभिर्नदीभिः सह सर्वे समुद्राः यस्य माहात्म्यं गायन्ति, यस्य चेमाः प्रदिशः प्राच्यारम्भा आग्नेय्याद्याः कोणदिशश्च बाहवो भुजारूपेण प्रसृताः प्रतिष्ठिताश्च सन्ति, कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

3.5 **येन द्यौरुग्रा पृथिवी च दृढा** इति पञ्चममन्त्रस्य पाठः |

**येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः |**

**यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ||**

3.5.1 पदपाठः

येन | द्यौः | उग्रा | पृथिवी | च | दृढा |
येन | स्व१रिति स्वः | स्तभितम् | येन | नाकः |
यः | अन्तरिक्षे | रजसः | विमानः |
कस्मै | देवाय | हविषा | विधेम ||

3.5.2 अन्वयः

येन द्यौः उग्रा पृथिवी च दृढा, येन स्वः स्तभितम्, येन नाकः, यः अन्तरिक्षे रजसः विमानः, कस्मै देवाय हविषा विधेम |

3.5.3 शब्दार्थः

**येन**= प्रजापतिना, **द्यौः**= द्युलोकः, **उग्रा**= ऊर्ध्वमुत्थापितम्, **पृथिवी**= भूमिः, **च**= पुनः, **दृढा**= स्थिरीकृता, **येन**= परमात्मना, **स्वः**= स्वर्गो लोकः, **स्तभितम्**= यथा अधो न पतति तथा उपरि स्थापितम्, **येन**= प्रजापतिना, **नाकः**= सूर्यः उत्तभितः, **यः**= परमात्मा, **अन्तरिक्षे**= अन्तरिक्षलोके, **रजसः**= जलस्य, **विमानः**= निर्माता अस्ति, **कस्मै**= 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय**= दानशीलाय, **हविषा**= हविर्द्रव्येण, **विधेम**= परिचरेम |

3.5.4 व्याख्या

येन हिरण्यगर्भात्मकेन प्रजापतिना द्यौरन्तरिक्षम् उग्रा ऊर्ध्वमुत्थाप्य स्थापितं पृथिवी भूमिश्च दृढा स्थिरीकृता, येन च परमात्मना स्वः स्वर्गलोकम् उपरि तथा स्तब्धं कृतं यथा अधो न पतति, नाकः सूर्यो येन अन्तरिक्षे स्तभितः, यश्चान्तरिक्षे रजसः उदकस्य विमानो निर्माता अस्ति कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

**3.6 यं क्रन्दसी अवसा तस्तभाने** इति षष्ठमन्त्रस्य पाठः |

**यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने |**

**यत्राधिसूर उदितो विभाति कस्मै देवाय हविषा विधेम ||**

3.6.1 पदपाठः

यम् | क्रन्दसी इति | अवसा | तस्तभाने इति |

अभि | ऐक्षेताम् | मनसा | रेजमाने इति |
यत्र | अधि | सूरः | उत्ऽइतः | विऽभाति |
कस्मै | देवाय | हविषा | विधेम ||

### 3.6.2 अन्वयः

अवसा तस्तभाने रेजमाने क्रन्दसी यम् मनसा अभ्यैक्षेताम्, यत्र अधि सूरः उदितः विभाति, कस्मै देवाय हविषा विधेम |

### 3.6.3 शब्दार्थः

**अवसा=** रक्षणेन, **तस्तभाने=** स्थिरीकृते, **रेजमाने=** देदीप्यमाने, **क्रन्दसी=** द्यावापृथिव्यौ, **यम्=** प्रजापतिम्, **मनसा=** बुद्ध्या, **अभ्यैक्षेताम्=** अभिपश्येताम्, **यत्र=** यस्मिन्, **अधि=** आधारे, **सूरः=** सूर्यः, **उदितः=** उदयं प्राप्य, **विभाति=** प्रकाशते, **कस्मै=** 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय=** दानशीलाय, **हविषा=** हविर्द्रव्येण, **विधेम=** परिचरेम |

### 3.6.4 व्याख्या

अवसा जगत्संरक्षणाय निर्माणाय च तस्तभाने स्थिरीकृते रेजमाने देदीप्यमाने क्रन्दसी द्यावापृथिव्यौ यं हिरण्यगर्भं प्रजापतिं मनसा बुद्ध्या अभ्यैक्षेतां अभिपश्येतां यत्राधि यस्मिन् आधारभूते प्रजापतौ सूरः सूर्यः उदितः उदयं प्राप्य विभाति प्रकाशते कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

## 3.7 आपो ह यद्बृहतीर्विश्वमायन् इति सप्तममन्त्रस्य पाठः|

**आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् |**
**ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ||**

### 3.7.1 पदपाठः

आपः | ह | यत् | बृहतीः | विश्वम् | आयन् |
गर्भम् | दधानाः | जनयन्तीः | अग्निम् |
ततः | देवानाम् | सम् | अवर्तत | असुः | एकः |
कस्मै | देवाय | हविषा | विधेम ||

### 3.7.2 अन्वयः

यत् गर्भम् दधानाः अग्निम् जनयन्तीः बृहतीः आपः ह विश्वम् आयन्, ततः देवानाम् एकः असुः समवर्तत | कस्मै देवाय हविषा विधेम |

### 3.7.3 शब्दार्थः

**यत्=** यदा, **गर्भम्=** जगद्रूपं गर्भं, **दधानाः=** धारयन्त्यः, **अग्निम्=** अग्न्युपलक्षितं सर्वम् वियदादि भूतजातं, **जनयन्तीः=** उत्पादयन्त्यः, **बृहतीः=** महत्यः, **आपः=** आपो देवीः, **ह=** प्रसिद्धम्, **विश्वम्=** सर्वम् जगद्, **आयन्=** व्याप्नुवन्, **ततः=** ताभ्योऽद्भ्यः सकाशात्, **देवानाम्=** इन्द्रादीनाम्, **एकः=** विशिष्टः, **असुः=** हिरण्यगर्भरूपः प्राणः, **समवर्तत=** समुत्पन्नः | **कस्मै=** 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय=** दानशीलाय, **हविषा=** हविर्द्रव्येण, **विधेम=** परिचरेम |

### 3.7.4 व्याख्या

यत् यदा गर्भं जगद्रूपगर्भं दधानाः धारयन्त्यः अग्निम् अग्निमुपलक्षितं सर्वमपि वियदादिभूतजातं जनयन्तीः उत्पादयन्त्यः बृहतीः बृहत्यो महत्यः आपः आपो देवीः ह प्रसिद्धं विश्वं सर्वम् चराचरात्मकं जगत् आयन् व्याप्नुवन् ततस्ताभ्योऽद्भ्यः सकाशात्, देवानाम् इन्द्रादीनाम् एको विशिष्टः असुः हिरण्यगर्भरूपः प्राणः समवर्तत समुत्पन्नः | कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

## 3.8 यश्चिदापो महिना पर्यपश्यत् इति अष्टममन्त्रस्य पाठः|

**यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् |**

**यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ||**

### 3.8.1 पदपाठः

यः | चित् | आपः | महिना | परिऽअपश्यत् |
दक्षम् | दधानाः | जनयन्तीः | यज्ञम् |
यः | देवेषु | अधि | देवः | एकः | आसीत् |
कस्मै | देवाय | हविषा | विधेम ||

### 3.8.2 अन्वयः

यः चित् यज्ञम् जनयन्तीः दक्षम् दधानाः आपः महिना पर्यपश्यत् यः देवेष्वधि एकः देवः आसीत् कस्मै देवाय हविषा विधेम |

### 3.8.3 शब्दार्थः

**यः=** परमात्मा, **चित्=** एव, **यज्ञम्=** यज्ञोपलक्षितं संपूर्णं जगत्, **जनयन्तीः=** उत्पादयन्त्यः, **दक्षम्=** सामर्थ्यशालिनं विष्णुम्, **दधानाः=** धारयन्त्यः, **आपः=** जलानि, **महिना=** स्वमाहात्म्येन,

**पर्यपश्यत्=** परितो दृष्टवान्, **यः=** परमात्मा, **देवेष्वधि=** तदानीं विद्यमानेषु सर्वेष्वपि देवेषु अत्यधिक ऐश्वर्यवान्, **एकः=** अद्वितीयः सन्, **देवः=** द्योतमानस्वभाव, **आसीत्=** भवति, **कस्मै=** 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय=** दानशीलाय, **हविषा=** हविर्द्रव्येण, **विधेम=** परिचरेम |

### 3.8.4 व्याख्या

यः परमात्मा चित् एव यज्ञम् यज्ञोपलक्षितं संपूर्णं जगत् जनयन्तीः उत्पादयन्त्यः दक्षम् सामर्थ्यशालिनं विष्णुम्, दधानाः धारयन्त्यः, आपः जलानि, महिना स्वमाहात्म्येन पर्यपश्यत् परितो दृष्टवान् यः परमात्मा, देवेष्वधि तदानीं विद्यमानेषु सर्वेष्वपि देवेषु अत्यधिक ऐश्वर्यवान् एकः अद्वितीयः सन् सर्वाधिष्ठातृत्वेन देवः द्योतमानस्वभाव आसीत् भवति, कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

### 3.9 मा नो हिंसीज्जनिता यः इति नवममन्त्रस्य पाठः |

**मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान |**
**यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ||**

### 3.9.1 पदपाठः

मा | नः | हिंसीत् | जनिता | यः | पृथिव्याः |
यः | वा | दिवम् | सत्यऽधर्मा | जजान |
यः | च | अपः | चन्द्राः | बृहतीः | जजान |
कस्मै | देवाय | हविषा | विधेम |

### 3.9.2 अन्वयः

नः मा हिंसीत् यः पृथिव्याः जनिता, यः वा सत्यधर्मा दिवम् जजान यः च चन्द्राः बृहतीः अपः जजान कस्मै देवाय हविषा विधेम |

### 3.9.3 शब्दार्थः

**नः=** अस्मान्, **मा=** मा, **हिंसीत्=** बाधताम्, **यः=** परमात्मा, **पृथिव्याः=** भूमेः, **जनिता=** जनयिता, **यः=** प्रजापतिः, **वा=** उत, **सत्यधर्मा=** सत्यनियमानां धारकोस्ति, **दिवम्=** यो हिरण्यगर्भः द्युलोकम्, **जजान=** जनयामास, **यः=** परमात्मा, **च=** पुनः, **चन्द्राः=** आनन्ददायकं

उज्ज्वलं प्रकाशमानम् **बृहतीः=** महत्यो **अपः=** जलम्, **जजान=** उत्पादयामास, **कस्मै=** 'क'संज्ञकायास्मै सुखस्वरूपाय प्रजापतये, **देवाय=** दानशीलाय, **हविषा=** हविर्द्रव्येण, **विधेम=** परिचरेम |

### 3.9.4 व्याख्या

सः प्रजापतिः नो अस्मान् मा हिंसीत् मा बाधताम् यः परमात्मा पृथिव्याः भूमेः जनिता जनयिता यः प्रजापतिः वा उत सत्यधर्मा सत्यनियमानां धारकोस्ति दिवम् यो हिरण्यगर्भः द्युलोकं जजान जनयामास यः परमात्मा च पुनः चन्द्राः आनन्ददायकं उज्ज्वलं प्रकाशमानं बृहतीः महत्यो अपः जलम् जजान उत्पादयामास,कस्मै देवाय तस्मै सुखस्वरूपाय 'क'संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः |

### 3.10 प्रजापते न त्वदेतान्यन्यः इति दशममन्त्रस्य पाठः|

**प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव |**

**यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ||**

### 3.10.1 पदपाठः

प्रजापते | न | त्वत् | एतानि | अन्यः |
विश्वा | जातानि | परि | ता | बभूव |
यत् | कामाः | ते | जुहुमः | तत् | नः | अस्तु |
वयम् | स्याम | पतयः | रयीणाम् ||

### 3.10.2 अन्वयः

प्रजापते ! त्वत् अन्यः न एतानि विश्वा जातानि ता परिबभूव | यत् कामाः ते जुहुमः तत् नः अस्तु वयम् रयीणाम् पतयः स्याम |

### 3.10.3 शब्दार्थः

**प्रजापते !=** हे हिरण्यगर्भरूपप्रजापते ! **त्वत्=** त्वद्भिन्नः, **अन्यः=** अपरः, **न=** नैव कश्चित् **एतानि=** इदानीं वर्तमानानि, **विश्वा=** विश्वानि, **जातानि=** भूतजातानि, **ता=** तानि, **परिबभूव=** परिगृह्णाति व्याप्नोति | **यत्=** यत्किञ्चित् फलम्, **कामाः=** कामयमानाः, **ते=** तुभ्यं, **जुहुमः=** हवींषि प्रयच्छामः, **तत्=** तत्फलम्, **नः=** अस्माकम्, **अस्तु=** भवतु, **वयम्=** यज्ञकर्तारो यजमानाः, **रयीणाम्=** सर्वविधधनानामैश्वर्याणाञ्च, **पतयः=** स्वामिनः, **स्याम=** भवेम |

### 3.10.4 व्याख्या

प्रजापते ! हे हिरन्यगर्भरूपप्रजापते ! त्वत् त्वद्भिन्नः अन्यः अपरः न नैव कश्चित् एतानि इदानीं वर्तमानानि विश्वा विश्वानि जातानि भूतजातानि प्रथमविकारभाञ्जि ता तानि परिबभूव परिगृह्णाति व्याप्नोति | यत् यत्किञ्चित् फलम् कामाः कामयमाना वयं यजमानः ते तुभ्यं जुहुमः हवींषि प्रयच्छामः तत् तत्फलम् नः अस्माकम् अस्तु भवतु वयं यज्ञकर्तारो यजमानाः रयीणाम् सर्वविधधनानामैश्वर्यानाञ्च पतयः स्वामिनः स्याम भवेम इत्यर्थः |

## 4.0 विषयसङ्ग्रहः

सूक्तमिदं ऋग्वेदसंहितायाः दशममण्डलात् सङ्गृहीतमस्ति | सूक्तेस्मिन् दश ऋचः सन्ति | प्रलयावस्थायां ब्रह्मणो हृदि सिसृक्षा जागृता **एकोऽहं बहु स्यां प्रजायेय** इति | जगदिदं स्रष्टुं स मायाध्यक्षः तपोऽतप्यत | तस्य तपोबलात् सर्वप्रथमं हिरण्मयाण्डः समुद्भूतः, तस्मिन् हिरण्मयाण्डे यः पुरुषः समुद्भूतः स एवास्य सूक्तस्य प्रथमायामृचि हिरण्यगर्भात्मना स्तुतः | स एव पुरुषः समस्तस्यास्य चराचरस्य स्वामी आसीत् | तेनैव सर्वमिदं प्रपञ्चं समुत्पादितम् | तेनैव पृथिव्या अन्तरिक्षस्य द्युलोकस्य च धारणं कृतम् | सोऽपि प्रजापतेः सकाशात् समुद्भूतत्वात् प्रजापतिरेवोक्तः | श्रुतौ **प्रजापतिर्वै कः** इत्युक्तम् | तस्मादयं 'क' इत्यनेनात्र सम्बोधितोस्ति | सर्वासां ऋचामन्ते **कस्मै देवाय हविषा विधेम** इति वाक्यं प्रयुक्तमस्ति | अस्य सूक्तस्याध्ययनेन प्रजापतेः मूलस्वरूपस्य ज्ञानं भवति | यस्मान्मायाध्यक्षादस्माकं संस्थितिस्तस्य ज्ञानमस्माभिरवश्यमेव कर्तव्यमिति धिया अस्य सूक्तस्याध्ययनमावश्यकम् |

A Gateway to all Post Graduate Courses